# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ४४

तद्दृष्ट्वा सुमहत्कर्म कृतं वानरसत्तमैः ।
क्रोधमाहारयामास युधि तीव्रमकम्पनः ॥ १॥

क्रोधमूर्छितरूपस्तु धुवन्परमकार्मुकम् ।
दृष्ट्वा तु कर्म शत्रूणां सारथिं वाक्यमब्रवीत् ॥ २॥

तत्रैव तावत्त्वरितं रथं प्रापय सारथे ।
एतेऽत्र बहवो घ्नन्ति सुबहून्राक्षसान्रणे ॥ ३॥

एतेऽत्र बलवन्तो हि भीमकायाश्च वानराः ।
द्रुमशैलप्रहरणास्तिष्ठन्ति प्रमुखे मम ॥ ४॥

एतान्निहन्तुमिच्छामि समरश्लाघिनो ह्यहम् ।
एतैः प्रमथितं सर्वं दृश्यते राक्षसं बलम् ॥ ५॥

ततः प्रजविताश्वेन रथेन रथिनां वरः ।
हरीनभ्यहनत्क्रोधाच्छरजालैरकम्पनः ॥ ६॥

न स्थातुं वानराः शेकुः किं पुनर्योद्धुमाहवे ।
अकम्पनशरैर्भग्नाः सर्व एव प्रदुद्रुवुः ॥ ७॥

तान्मृत्युवशमापन्नानकम्पनवशं गतान् ।
समीक्ष्य हनुमाञ्ज्ञातीनुपतस्थे महाबलः ॥ ८॥

तं महाप्लवगं दृष्ट्वा सर्वे प्लवगयूथपाः ।
समेत्य समरे वीराः सहिताः पर्यवारयन् ॥ ९॥

व्यवस्थितं हनूमन्तं ते दृष्ट्वा हरियूथपाः ।
बभूवुर्बलवन्तो हि बलवन्तमुपाश्रिताः ॥ १०॥

अकम्पनस्तु शैलाभं हनूमन्तमवस्थितम् ।
महेन्द्र इव धाराभिः शरैरभिववर्ष ह ॥ ११॥

अचिन्तयित्वा बाणौघाञ्शरीरे पतिताञ्शितान् ।
अकम्पनवधार्थाय मनो दध्रे महाबलः ॥ १२॥

स प्रहस्य महातेजा हनूमान्मारुतात्मजः ।
अभिदुद्राव तद्रक्षः कम्पयन्निव मेदिनीम् ॥ १३॥

तस्याभिनर्दमानस्य दीप्यमानस्य तेजसा ।
बभूव रूपं दुर्धर्षं दीप्तस्येव विभावसोः ॥ १४॥

आत्मानं त्वप्रहरणं ज्ञात्वा क्रोधसमन्वितः ।
शैलमुत्पाटयामास वेगेन हरिपुङ्गवः ॥ १५॥

तं गृहीत्वा महाशैलं पाणिनैकेन मारुतिः ।
विनद्य सुमहानादं भ्रामयामास वीर्यवान् ॥ १६॥

ततस्तमभिदुद्राव राक्षसेन्द्रमकम्पनम् ।
यथा हि नमुचिं सङ्ख्ये वज्रेणेव पुरन्दरः ॥ १७॥

अकम्पनस्तु तद्दृष्ट्वा गिरिशृङ्गं समुद्यतम् ।
दूरादेव महाबाणैरर्धचन्द्रैर्व्यदारयत् ॥ १८॥

तत्पर्वताग्रमाकाशे रक्षोबाणविदारितम् ।
विकीर्णं पतितं दृष्ट्वा हनूमान्क्रोधमूर्छितः ॥ १९॥

सोऽश्वकर्णं समासाद्य रोषदर्पान्वितो हरिः ।
तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितम् ॥ २०॥

तं गृहीत्वा महास्कन्धं सोऽश्वकर्णं महाद्युतिः ।
प्रहस्य परया प्रीत्या भ्रामयामास संयुगे ॥ २१॥

प्रधावन्नुरुवेगेन प्रभञ्जंस्तरसा द्रुमान् ।
हनूमान्परमक्रुद्धश्चरणैर्दारयत्क्षितिम् ॥ २२॥

गजांश्च सगजारोहान्सरथान्रथिनस्तथा ।
जघान हनुमान्धीमान्राक्षसांश्च पदातिकान् ॥ २३॥

तमन्तकमिव क्रुद्धं समरे प्राणहारिणम् ।
हनूमन्तमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः ॥ २४॥

तमापतन्तं सङ्क्रुद्धं राक्षसानां भयावहम् ।
ददर्शाकम्पनो वीरश्चुक्रोध च ननाद च ॥ २५॥

स चतुर्दशभिर्बाणैः शितैर्देहविदारणैः ।

निर्बिभेद हनूमन्तं महावीर्यमकम्पनः ॥ २६ ॥

स तथा प्रतिविद्धस्तु बह्वीभिः शरवृष्टिभिः ।
हनूमान्ददृशे वीरः प्ररूढ इव सानुमान् ॥ २७ ॥

ततोऽन्यं वृक्षमुत्पाट्य कृत्वा वेगमनुत्तमम् ।
शिरस्यभिजघानाशु राक्षसेन्द्रमकम्पनम् ॥ २८ ॥

स वृक्षेण हतस्तेन सक्रोधेन महात्मना ।
राक्षसो वानरेन्द्रेण पपात स ममार च ॥ २९ ॥

तं दृष्ट्वा निहतं भूमौ राक्षसेन्द्रमकम्पनम् ।
व्यथिता राक्षसाः सर्वे क्षितिकम्प इव द्रुमाः ॥ ३० ॥

त्यक्तप्रहरणाः सर्वे राक्षसास्ते पराजिताः ।
लङ्कामभिययुस्त्रस्ता वानरैस्तैरभिद्रुताः ॥ ३१ ॥

ते मुक्तकेशाः सम्भ्रान्ता भग्नमानाः पराजिताः ।
स्रवच्छ्रमजलैरङ्गैः श्वसन्तो विप्रदुद्रुवुः ॥ ३२ ॥

अन्योन्यं प्रममन्तुस्ते विविशुर्नगरं भयात् ।
पृष्ठतस्ते सुसंमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ ३३ ॥

तेषु लङ्कां प्रविष्टेषु राक्षसेषु महाबलाः ।
समेत्य हरयः सर्वे हनूमन्तमपूजयन् ॥ ३४ ॥

सोऽपि प्रहृष्टस्तान्सर्वान्हरीन्सम्प्रत्यपूजयत् ।
हनूमान्सत्त्वसम्पन्नो यथार्हमनुकूलतः ॥ ३५ ॥

विनेदुश्च यथा प्राणं हरयो जितकाशिनः ।
चकर्षुश्च पुनस्तत्र सप्राणानेव राक्षसान् ॥ ३६ ॥

स वीरशोभामभजन्महाकपिः
समेत्य रक्षांसि निहत्य मारुतिः ।
महासुरं भीममभित्रनाशनं
यथैव विष्णुर्बलिनं चमूमुखे ॥ ३७ ॥

अपूजयन्देवगणास्तदा कपिं
स्वयं च रामोऽतिबलश्च लक्ष्मणः ।
तथैव सुग्रीवमुखाः प्लवङ्गमा
विभीषणश्चैव महाबलस्तदा ॥ ३८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com